**CLASS-X**

**विषय : संस्कृतम् सम्प्रेषणात्मकम्**

**निर्धारितसमयः - होरात्रयम्** **पूर्णाङ्काः - 90**

*निर्देशाः -* *(1)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्डः ('क') अपठित-अवबोधनम्* **- 10 अङ्काः**

*खण्डः ('ख') रचनात्मक-कार्यम्* **- 15 अङ्काः**

*खण्डः ('ग') अनुप्रयुक्त-व्याकरणम्* **- 30 अङ्काः**

*खण्डः ('घ') पठित-अवबोधनम्* **- 35 अङ्काः**

*(2)* *सर्वे प्रश्नाः अनिवार्याः।*

*(3)* *प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमणैव लेखनीयानि।*

*(4)* *प्रश्नसंख्या अवश्यं लेखनीया।*

*(5)* *उत्तराणि संस्कृतेन एव लेखनीयानि।*

**खण्डः 'क' (अपठित-अवबोधनम्)** **10 अङ्काः**

प्र1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

संस्कृतभाषा सरला सरसा च अस्ति। संस्कृतभाषा देवभाषा देववाणी गीर्वाणवाणी च कथ्यते। संस्कृतभाषायां चत्वारः वेदाः सन्ति। ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च। वेदानां विषये वर्णितमस्ति - "धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः" वैदिकसाहित्यस्य अन्येऽपि ग्रन्थाः संस्कृतभाषायामेव सन्ति। यथा - ब्राह्मणग्रन्थाः, आरण्यकाः, षड्वेदाङ्गाः, षड्दर्शनानि, उपनिषदः। वाल्मीकि-विचरितं रामायणम्, व्यास-प्रणीतं महाभारतम्, कुविकुलशिरोमणिकालिदासेन विलिखितम् अभिज्ञानशाकुन्तलम् च संस्कृतभाषायाः गुणगौरवं महत्त्वं च प्रकटयन्ति। धन्या एषा भाषा।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x4=4)

(i) संस्कृतभाषा कीदृशी अस्ति?

(ii) संस्कृत भाषायां कति वेदाः सन्ति?

(iii) व्यासप्रणीतं किम् अस्ति?

(iv) प्रथमः वेदः कः अस्ति?

(II) पूर्णवाक्येन उत्तरत - (1x2=2)

(i) वेदानां विषये किं वर्णितमस्ति?

(ii) के ग्रन्थाः संस्कृतस्य गुणगौरवं प्रकटयन्ति?

(III) निर्देशानुसारम् उत्तरत - (1x4=4)

(i) 'वेदाः' इत्यत्र किं विशेषणपदम्?

(अ) सरला (ब) देव भाषा

(स) संस्कृत (द) चत्वारः

(ii) 'संस्कृतभाषायां चत्वारः वेदाः सन्ति' इति वाक्ये 'सन्ति' क्रियायाः कर्तृपदं किम्?

(अ) भाषायां (ब) वेदाः

(स) संस्कृत (द) संस्कृतम्

(iii) 'रचितम्' इति शब्दस्य पर्यायपदं किम्?

(अ) प्रणीतम् (ब) लिखिता

(स) लिख् (द) वेदः

(iv) 'एषा' सर्वनामपदं कस्यै प्रयुक्तम्?


(अ) वेदेभ्यः (ब) संस्कृतभाषायै

(स) भाषायै (द) उपनिषदां कृते

**खण्डः 'ख' (रचनात्मक-कार्यम्)** **15 अङ्का**

प्र2. चित्रं दृष्ट्वा प्रदत्तपदानां सहायतया चित्रस्य वर्णनम् पञ्चसंस्कृतवाक्येषु कुरुत - (2x5=10)

| मञ्जूषा |
|---|
| हरिद्वारे, तीर्थम्, गंगायाः, ध्वजाः, स्नानं, मन्दिराणि, शिखरेषु, पूजां, कीर्तनम्, दीप्तम्, पुष्पम्, अर्चनाम् |



अथवा

'विद्यालये दशमकक्षायाः दीक्षान्तसमारोहः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि संस्कृतेन लिखत।

| मञ्जूषा |
|---|
| अल्पाहारस्य, व्यवस्था, मस्तके, आशीर्वादः, सांस्कृतिक कार्यक्रमः, प्रधानाचार्येण, तिलकं, प्रांगणे, संस्कृताध्यापकेन, कृतम्, आयोजितः, छात्रेभ्यः |

3. भवान् सोमः। भवतः अनुजः श्यामः मतदानं न करोति। तं प्रति अधोलिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखतु। (½x10=5)

| मञ्जूषा |
|---|
| अस्माकम्, लोकतन्त्रदेशे, त्वम्, दायित्वं, अवश्यं, कमलानगरतः, आयुष्मान् भव, लोकतन्त्रात्मकम्, भ्रष्टाचारे, सोमः |

दिल्लीनगरम्

____(i)____

__________

प्रिय अनुज श्याम!

____(ii)____

अत्र सर्वं कुशलम्। तत्रापि कुशलं कामये। अनुज! ____(iii)____ जानासि एव यत् अस्माकम् देशे ____(iv)____ शासनं विद्यते। तदनुसारम् अस्माकम् एकं महत्त्वपूर्णम् ____(v)____ अस्ति। यदा सभ्याः जनाः योग्याय मतदानं न दत्त्वा अविचार्य वा मतदानं कुर्वन्ति तदा ____(vi)____ ये राजनेतारः तिष्ठन्ति, ते जनान् शोषयन्ति। स्वलाभार्थम् ____(vii)____ निमग्नाः भवन्ति। अतः ____(viii)____ अपि दायित्वम् अस्ति इति विचार्य मतदानं ____(ix)____ करणीयम्।

तव अग्रजः

____(x)____

## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) 30 अङ्काः

प्र4. (I) अधोलिखितवाक्येषु रेखाङ्कितपदानि समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x3=3)

(i) यथोचितं क्रियताम्।

(अ) यथा + उचितम् (ब) यथा + उचिताम्

(स) यथो + उचितम् (द) यथा + औचितम्

(ii) कामात् क्रोधः + अभिजायते।

(अ) क्रोधोऽभिजायते (ब) क्रोधाभिजायते

(स) क्रोध अभिजायते (द) क्रोधरभिजायते

(iii) त्वम् इहैव तिष्ठ।

(अ) इह + एव (ब) इहा + एव

(स) इहे + व (द) इहः + एव

(II) अधोलिखितवाक्ययोः रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत - (1x2=2)

(i) धनस्य अधिकः सम् + चयः न कर्तव्यः।

(ii) एतच्छरेण व्याधः तिष्ठः जातः।

प्र5. (I) अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x4=4)

(i) अनर्घम् च किम्?

(अ) न अर्घम् (ब) अघम् विना

(स) अघण सह (द) अर्घाय तत्

(ii) सप्ताहे सप्त दिवसाः भवन्ति?

(अ) सप्त अहानि (ब) सप्तानाम् अह्नाम् समाहारः तस्मिन्

(स) सप्त च ते अहाः (द) सप्तानि अहानि

(iii) दैवेन रक्षितः न नश्यति।

(अ) दैवरक्षितः (ब) दैवेरक्षितः

(स) दैवारक्षितः (द) देवरक्षितः

(iv) अस्माकं वदनाम्बुजे सर्वदा सन्निधिं क्रियात्।

(अ) वदने अम्बुजे (ब) वदनम् एव अम्बुजम् तस्मिन्

(स) वदनस्य अम्बुजम् (द) वदनाय अम्बुजम्, तस्मिन्

(II) अधोलिखितयोः वाक्ययोः समासं विग्रहं वा कृत्वा लिखत - (1x2=2)

(i) श्वेतम् पुष्पम् अत्र आनय।

(ii) अष्टाध्यायी व्याकरणस्य प्रसिद्धः ग्रन्थः।

प्र6. (I) अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत - (1x3=3)

(i) सम्प्रति देशस्य _________ (आर्थिक + ठक्) उन्नतिः सर्वत्र दृश्यते।

(अ) आर्थिक (ब) आर्थिकि

(स) आर्थिकी (द) आर्थिकम्

(ii) तस्याः माता _________ (ज्ञान + मतुप्) अस्ति।

(अ) ज्ञानमती (ब) ज्ञानवान्

(स) ज्ञानवती (द) ज्ञातवान्

(iii) अत्र कोऽपि _________ (रोग + इन्) न भवति।

(अ) रोगी (ब) रोगिन्

(स) रुग्णः (द) रुग्णाय

(II) अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत - (1x2=2)

(i) पत्रवाहकेन पत्राणि _________। (आ + नी + तव्यत्)

(ii) सदा सद्वचनं श्रवणीयम्।

7. प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत - (1x5=5)

| मञ्जूषा |
| --- |
| विना, इतस्ततः, पुरा, एव, अधुना, यथा-तथा |

(i) __________ अहं संस्कृतस्य परीक्षां ददामि।

(ii) विद्यां __________ जीवनं नरकम्।

(iii) शिशुः __________ भ्रमति।

(iv) __________ राजा दशरथः आसीत्।

(v) सत्यम् __________ जयते।

प्र8. (I) अधोलिखित-संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत - (1x3=3)

माता - पुत्रि! बहिः के आगच्छन्ति?

पुत्री - मातः! बहिः भिक्षुकैः ___(i)___

(अ) आगच्छन्ति (ब) आगम्यन्ते

(स) आगच्छति (द) आगम्यते

माता - पुत्रि! किं ते भोजनं याचन्ते?

पुत्री - मातः! ___(ii)___ भोजनं न याच्यते।

(अ) ताभिः (ब) तेन

(स) तैः (द) तया

माता - तर्हि भिक्षुकाः किम् अभिलषन्ति?

पुत्री - मातः! भिक्षुकैः ___(iii)___ अभिलष्यन्ते।

(अ) वस्त्रेण (ब) वस्त्राणि

(स) वस्त्रम् (द) वस्त्राय

(II) अधोलिखितसंवादे वाच्यानुसारं रिक्तस्थानं पूरयत - (1x2=2)

भव्याः - अहम् गणतन्त्रदिवसस्य कार्यक्रमं द्रष्टुम् गच्छामि।

भावुक - भव्ये! ___(i)___ अपि कार्यक्रमं द्रष्टुम् गम्यते।

भव्याः - शोभनम्। त्वम् अपि मया सह चल, एतं कार्यक्रमं च पश्य।

भावुक - मया तु प्रतिवर्षम् एषः ___(ii)___ दूरदर्शने दृश्यते।

प्र9. अंकान् संस्कृतेन लिखत - (1x4=4)

(i) मैट्रो यानं 9.00 ________ वादने शाहदरा मैट्रो स्थाने तिष्ठति।

(अ) नव (ब) नवः

(स) नवम् (द) नवम

(ii) एतत् 10.15 ________ वादने कश्मीरी गेट स्थानम् आगच्छति।

(अ) दश वादने (ब) दशमार्धवादने

(स) सपाददश (द) साधदश

(iii) 10.30 _________ वादने तीस हजारी स्थानं आगच्छति।

(iv) एतत् 11.45 _________ वादने रिठाला रेलस्थानम् आगमिष्यति।

**खण्डः 'घ' (पठित-अवबोधनम्)** **35 अङ्काः**

प्र10. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

*(अ) गद्यांशः*

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलित-काष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालाम् प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) ऊर्णाप्रचुरः मेषः कुत्र प्रविशति?

(ii) मेषः कस्मात् कारणात् भूमौ लुठति?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

तस्य क्षितौ प्रलुठतः केषु वह्निज्वालाः समुत्थिताः?

(III) निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (½x2=1)

(i) 'अन्यस्मिन्' इति पदस्य अत्र विशेष्यपदं किम्?

(अ) यावत् (ब) अहनि

(स) काले (द) दिने

(ii) 'धरायाम्' अस्य पर्यायवाचिपदं लिखत।

(अ) भूमि (ब) तृणेषु

(स) भूमौ (द) काष्ठेन

*(आ) पद्यांशः*

कस्य वशे प्राणिगणः? सत्यप्रियभाषिणो विनीतस्य।
क्व स्थातव्यम्? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) कीदृशे पथि स्थातव्यम्?

(ii) न्यायस्य मार्गः कीदृशः अस्ति?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

प्राणिगणः कस्य वशे तिष्ठति?

(III) निर्देशानुसारम् शुद्धम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत - (½x2=1)

(i) पद्यांशे प्रयुक्तं 'पथि' इत्यस्य विशेषणपदं किम्?

(अ) स्थातव्यम् (ब) न्याय्यम्

(स) न्याय्ये (द) वशे

(ii) 'विनम्रस्य' इत्यस्य पर्यायपदं किम्?

(अ) प्राणिगण (ब) विनीतस्य

(स) स्थातव्यम् (द) न्याय्ये

(इ) *नाट्यांश*

राजा - (शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्) 'हा! दग्धाः मे घोटकाः कथं रक्षणीयाः? सपदि उपायः क्रियताम्।'

राजवैद्यः - कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥

*प्रश्नाः*

(I) एकपदेन उत्तरत - (1x2=2)

(i) राजा कान् आहूय अपृच्छत्?

(ii) केषां वह्निदोषः कपिमेदसा शाम्यति?

(II) पूर्णवाक्येन उत्तरत - (2x1=2)

सूर्योदये किं नाशम् अभ्येति?

(III) निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (½x2=1)

(i) 'गुणः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

(अ) सपदि (ब) मेदस्

(स) दोषः (द) प्रदोषः

(ii) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) तमः (ब) घोटकाः

(स) राजा (द) राजवैद्यः

प्र11. अधोलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत - (½x8=4)

| मञ्जूषा |
|---|
| अन्यथा, निश्चयं, अनिश्चितमतिः, अद्भुतः, विद्यायाः, क्षयम्, व्ययेन, पापी |

(I) दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।
कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः ॥

भावार्थः - तस्मात् अधिकं ___(i)___ सः एव भवति यः दानाय ___(ii)___ कृत्वा कृपणतावशात् ___(iii)___ भूत्वा मनः ___(iv)___ करोति।

(II) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

भावार्थः - हे सरस्वति! तव अयम् ___(i)___ कोशः अतीव ___(ii)___ अस्ति। यः ___(iii)___ तु वर्धते, सञ्चयेन ___(iv)___ च याति।

प्र12. मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयम् पूरयत - (1x4=4)

| मञ्जूषा |
|---|
| तत्, देवेन्द्रः, समीपं, वृणीष्व |

शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।
वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम् ॥

अन्वयः - राजर्षे! अहं ____(i)____ शक्रः त्वत् ____(ii)____ उपागतः अस्मि। वरं ____(iii)____ यत् इच्छसि ____(iv)____ उच्यताम्।

प्र14. वाक्येषु रेखाङ्कितपदानां स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(i) राजा प्रीत्या याचकाय नेत्रं समर्पितवान्।

(ii) विद्या समम् चक्षुः न अस्ति।

(iii) राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्।

(iv) राजा पुत्रवत् प्रजाः पालयति स्म।

प्र15. अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि - (½x8=4)

(i) राजा तस्मै चक्षुर्द्वयम् एव प्रयच्छति।

(ii) सः पुत्रवत् प्रजाः पालयति स्म।

(iii) भगवान् बोधिसत्त्वः शिवीनां राजा बभूव।

(iv) इदम् दृष्ट्वा शक्रः विस्मितः भवति।

(v) तस्य दानशीलतां परीक्षितुं देवराजः इन्द्रः नेत्रहीनयाचकस्य रूपे आगतः।

(vi) पुनः राज्ञः पुरतः उपस्थितः भूत्वा शक्रः तस्मै वरं यच्छति।

(vii) राज्ञः दानशीलतां श्रुत्वा देशान्तरेभ्योऽपि जनाः तत्र आयान्ति स्म।

(viii) सः याचकः एकस्य चक्षुषः दानम् अयाचत।

प्र16. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत - (1x4=4)

(i) यूथपः सर्वान् कपीन् आहूय रहसि अवदत्।

(अ) गुप्तस्थाने (ब) एकान्ते

(स) गोपनीयः (द) गुप्तः

(ii) अनर्घम् किम्? यत् अवसरे दत्तम्।

(अ) अनवद्यम् (ब) पुण्यम्

(स) सुखदा (द) अमूल्यम्

(iii) शिष्यः सब्रह्मचारिभिः पादम् आदत्ते।

(अ) सहपाठिभिः (ब) अध्यापकैः

(स) शिष्यैः (द) अध्यापिकायै

(iv) अन्यस्मिन् अहनि स मेषः महानसं प्रविशति।

(अ) मध्याह्नम् (ब) रात्रि

(स) प्रातःकाले (द) दिवसे